श्रीगणेशायनमः॥ श्रीशिवायगुरवेनमः॥ अथश्राद्धसूक्तं॥ ॐ तत्सवितुर्वरेण्यम्भ
र्गोदेवस्यधीमहि॥ धियोयोनः प्रचोदयात्॥१॥ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसी
जायतामाराष्ट्रेराजन्यः शूर इषव्योतिव्याधीमहारथोजायतान्दोग्ध्रीधेनुर्वो
ढानड्वानाशुः सप्तिः पुरन्धिर्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्य
वीरोजायतान्निकामेनिकामेनः पर्जन्योवर्षतुफलवत्योन ओषधयः
पच्यन्तांयोगक्षेमोनः कल्पताम्॥१॥ नमः कृत्स्नायतयाधावतेसत्वनाम्पतये
नमोनमः सहमानायनिव्याधिनआव्याधिनीनाम्पतयेनमोनमोनिषङ्गिणे
ककुभायस्तेनानाम्पतयेनमोनमोनिचेरवेपरिचरायारण्यानाम्पतयेनमः

१ नमो वञ्चते ॥२॥ नमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमो नमो निषङ्गिण ऽइषुधि
मते तस्कराणाम्पतये नमो नमः सृकायिभ्यो जिघाᳫं सद्भ्यो मुष्णताम्पतये नमो
नमो ऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानाम्पतये नमः ॥३॥ नमो धृष्णवे च प्रमृशा
य च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुध
य च सुधन्वने च ॥४॥ सोमो धेनुᳫं सोमो ऽअर्वन्तमाशुᳫं सोमो वीरङ्कर्मण्यन्द
दाति ॥ सादन्यं विदथ्यᳫं सभेयम्पितृश्रवणं यो ददाशदस्मै ॥५॥ विज्यन्धनुः
कपर्द्दिनो विशल्यो बाणवाँ२ ॥ ऽउत ॥ अनेशन्नस्यया ऽइषव ऽआभुरस्य निष
ङ्गधिः ॥६॥ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ॥ तेषाᳫं सहस्रयोजने

नेबधन्वानितन्मसि॥७॥सऽइषुहस्तैःसनिषङ्गि·भिर्वशीसंस्रष्टासयुधऽइंद्रो
गणेन॥सं॰सृष्टजित्सोमपाबाहुशर्ध्युग्रधन्वाप्रतिहिताभिरस्ता॥८॥कृणुष्वपा
जःप्रसितिंन्नपृथ्वींयाहिराजेवामवाँ॥ऽइभेन॥तृष्वीमनुप्रसितिन्द्रूणानोअ
सिविध्यरक्षसस्तपिष्ठैः॥९॥तवभ्रमासऽआशुयापतंत्यनुस्पृशधृषता
शोशुचानः॥तपूंष्यग्नेजुह्वापतंगानसंदितोबिसृजविष्वगुल्काः॥१०॥
तिस्पशोबिसृजतूर्णितमोभवापायुर्विशोऽअस्याऽअदब्धः॥योनोदूरे
अघशंसोयोऽअंत्यग्नेमाकिष्टेव्यथिरादधर्षीत्॥११॥उदग्नेतिष्ठप्रत्यातनु
न्यमित्राँऽओषतात्तिग्महेते॥योनोअरातिंसमिधानचक्रेनीचातं

त्सन्नसुकम्॥१२॥ऊर्द्धौभवप्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने॥अव
स्थिरातनुहियातुजूनांजामिमजामिंप्रमृणीहिशत्रून्॥१३॥अग्नयेकव्यवा
हनायस्वाहासोमायपितृमतेस्वाहा॥अपहता॰असुरारक्षा७सिवेदिषदः॥१४
येरूपाणिप्रतिमुञ्चमाना॰असुराःसन्तःस्वधयाचरन्ति॥परापुरोनिपुरोयेभ
रंत्यग्निष्टांल्लोकात्प्रणुदात्यस्मात्॥१५॥अत्रपितरोमादयध्वंयथाभागमावृ
षायध्वम्॥अमीमदन्तपितरोयथाभागमावृषायिषत॥१६॥नमोवःपितरोरसाय
नमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायैनमोवः